# shrI ChinnamastA sahasranAma stotram

# શ્રીછિન્નમસ્તાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : chhinnamastA sahasranAma stotram

File name : chhinnamastaasahasra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : vishvasAratantre shivapArvatIsa.nvAde. See corresonding nAmAvalI.

Latest update : February 12, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીછિન્નમસ્તાસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીદેવ્યુવાચ ।
દેવદેવ મહાદેવ સર્વશાસ્ત્રવિદાંવર ।
કૃપાં કુરુ જગન્નાથ કથયસ્વ મમ પ્રભો ॥ ૧॥

પ્રચણ્ડચણ્ડિકા દેવી સર્વલોકહિતૈષિણી ।
તસ્યાશ્ચ કથિતં સર્વં સ્તવં ચ કવચાદિકમ્ ॥ ૨॥

ઇદાનીં છિન્નમસ્તાયા નામ્નાં સાહસ્રકં શુભમ્ ।
ત્વં પ્રકાશય મે દેવ કૃપયા ભક્તવત્સલ ॥ ૩॥

શ્રીશિવ ઉવાચ ।
શ ृણુ દેવિ પ્રવક્ષ્યામિ ચ્છિન્નાયાઃ સુમનોહરમ્ ।
ગોપનીયં પ્રયત્નેન યદીચ્છેદાત્મનો હિતમ્ ॥ ૪॥

ન વક્તવ્યં ચ કુત્રાપિ પ્રાણૈઃ કણ્ઠગતૈરપિ ।
તચ્છૃણુષ્વ મહેશાનિ સર્વં તત્કથયામિ તે ॥ ૫॥

વિના પૂજાં વિના ધ્યાનં વિના જાપ્યેન સિદ્ધ્યતિ ।
વિના ધ્યાનં તથા દેવિ વિના ભૂતાદિશોધનમ્ ॥ ૬॥

પઠનાદેવ સિદ્ધિઃ સ્યાત્સત્યં સત્યં વરાનને ।
પુરા કૈલાસશિખરે સર્વદેવસભાલયે ॥ ૭॥

પરિપપ્રચ્છ કથિતં તથા શ ृણુ વરાનને ।

ૐ અસ્ય શ્રીપ્રચણ્ડચણ્ડિકાસહસ્રનામસ્તોત્રસ્ય ભૈરવ ઋષિઃ ,
સમ્રાટ્ છન્દઃ , પ્રચણ્ડચણ્ડિકા દેવતા ,
ધર્માર્થકામમોક્ષાર્થે પાઠે વિનિયોગઃ ॥ ૮॥

ૐ પ્રચણ્ડચણ્ડિકા ચણ્ડા ચણ્ડદૈત્યવિનાશિની ।

ચામુણ્ડા ચ સચણ્ડા ચ ચપલા ચારુદેહિની ॥ ૯॥

લલજિહ્વા ચલદ્રક્તા ચારુચન્દ્રનિભાનના ।
ચકોરાક્ષી ચણ્ડનાદા ચઞ્ચલા ચ મનોન્મદા ॥ ૧૦॥

ચેતના ચિતિસંસ્થા ચ ચિત્કલા જ્ઞાનરૂપિણી ।
મહાભયઙ્કરી દેવી વરદાભયધારિણી ॥ ૧૧॥

ભવાઢ્યા ભવરૂપા ચ ભવબન્ધવિમોચિની ।
ભવાની ભુવનેશી ચ ભવસંસારતારિણી ॥ ૧૨॥

ભવાબ્ધિર્ભવમોક્ષા ચ ભવબન્ધવિઘાતિની ।
ભાગીરથી ભગસ્થા ચ ભાગ્યભોગપ્રદાયિની ॥ ૧૩॥

કમલા કામદા દુર્ગા દુર્ગબન્ધવિમોચિની ।
દુર્દ્દર્શના દુર્ગરૂપા દુર્જ્ઞેયા દુર્ગનાશિની ॥ ૧૪॥

દીનદુઃખહરા નિત્યા નિત્યશોકવિનાશિની ।
નિત્યાનન્દમયા દેવી નિત્યં કલ્યાણકારિણી ॥ ૧૫॥

સર્વાર્થસાધનકરી સર્વસિદ્ધિસ્વરૂપિણી ।
સર્વક્ષોભણશક્તિશ્ચ સર્વવિદ્રાવિણી પરા ॥ ૧૬॥

સર્વરઞ્જનશક્તિશ્ચ સર્વોન્માદસ્વરૂપિણી ।
સર્વદા સિદ્ધિદાત્રી ચ સિદ્ધવિદ્યાસ્વરૂપિણી ॥ ૧૭॥

સકલા નિષ્કલા સિદ્ધા કલાતીતા કલામયી ।
કુલજ્ઞા કુલરૂપા ચ ચક્ષુરાનન્દદાયિની ॥ ૧૮॥

કુલીના સામરૂપા ચ કામરૂપા મનોહરા ।
કમલસ્થા કઞ્જમુખી કુઞ્જરેશ્વરગામિની ॥ ૧૯॥

કુલરૂપા કોટરાક્ષી કમલૈશ્વર્યદાયિની ।
કુન્તી કકુદ્મિની કુલ્લા કુરુકુલ્લા કરાલિકા ॥ ૨૦॥

કામેશ્વરી કામમાતા કામતાપવિમોચિની ।
કામરૂપા કામસત્વા કામકૌતુકકારિણી ॥ ૨૧॥

કારુણ્યહૃદયા ક્રીંક્રીંમન્ત્રરૂપા ચ કોટરા ।
કૌમોદકી કુમુદિની કૈવલ્યા કુલવાસિની ॥ ૨૨॥

કેશવી કેશવારાધ્યા કેશિદૈત્યનિષૂદિની ।
ક્લેશહા ક્લેશરહિતા ક્લેશસઙ્ઘવિનાશિની ॥ ૨૩॥

કરાલી ચ કરાલાસ્યા કરાલાસુરનાશિની ।
કરાલચર્માસિધરા કરાલકલનાશિની ॥ ૨૪॥

કઙ્કિની કઙ્કનિરતા કપાલવરધારિણી ।
ખડ્ગહસ્તા ત્રિનેત્રા ચ ખણ્ડમુણ્ડાસિધારિણી ॥ ૨૫॥

ખલહા ખલહન્ત્રી ચ ક્ષરન્તી ખગતા સદા ।
ગઙ્ગાગૌતમપૂજ્યા ચ ગૌરી ગન્ધર્વવાસિની ॥ ૨૬॥

ગન્ધર્વા ગગણારાધ્યા ગણા ગન્ધર્વસેવિતા ।
ગણત્કારગણા દેવી નિર્ગુણા ચ ગુણાત્મિકા ॥ ૨૭॥

ગુણતા ગુણદાત્રી ચ ગુણગૌરવદાયિની ।
ગણેશમાતા ગમ્ભીરા ગગણા જ્યોતિકારિણી ॥ ૨૮॥

ગૌરાઙ્ગી ચ ગયા ગમ્યા ગૌતમસ્થાનવાસિની ।
ગદાધરપ્રિયા જ્ઞેયા જ્ઞાનગમ્યા ગુહેશ્વરી ॥ ૨૯॥

ગાયત્રી ચ ગુણવતી ગુણાતીતા ગુણેશ્વરી ।
ગણેશજનની દેવી ગણેશવરદાયિની ॥ ૩૦॥

ગણાધ્યક્ષનુતા નિત્યા ગણાધ્યક્ષપ્રપૂજિતા ।
ગિરીશરમણી દેવી ગિરીશપરિવન્દિતા ॥ ૩૧॥

ગતિદા ગતિહા ગીતા ગૌતમી ગુરુસેવિતા ।
ગુરુપૂજ્યા ગુરુયુતા ગુરુસેવનતત્પરા ॥ ૩૨॥

ગન્ધદ્વારા ચ ગન્ધાઢ્યા ગન્ધાત્મા ગન્ધકારિણી ।
ગીર્વાણપતિસમ્પૂજ્યા ગીર્વાણપતિતુષ્ટિદા ॥ ૩૩॥

ગીર્વાણાધિશરમણી ગીર્વાણાધિશવન્દિતા ।
ગીર્વાણાધિશસંસેવ્યા ગીર્વાણાધિશહર્ષદા ॥ ૩૪॥

ગાનશક્તિર્ગાનગમ્યા ગાનશક્તિપ્રદાયિની ।
ગાનવિદ્યા ગાનસિદ્ધા ગાનસન્તુષ્ટમાનસા ॥ ૩૫॥

ગાનાતીતા ગાનગીતા ગાનહર્ષપ્રપૂરિતા ।
ગન્ધર્વપતિસંહૃષ્ટા ગન્ધર્વગુણમણ્ડિતા ॥ ૩૬॥

ગન્ધર્વગણસંસેવ્યા ગન્ધર્વગણમધ્યગા ।
ગન્ધર્વગણકુશલા ગન્ધર્વગણપૂજિતા ॥ ૩૭॥

ગન્ધર્વગણનિરતા ગન્ધર્વગણભૂષિતા ।
ઘર્ઘરા ઘોરરૂપા ચ ઘોરઘુર્ઘુરનાદિની ॥ ૩૮॥

ઘર્મબિન્દુસમુદ્ભૂતા ઘર્મબિન્દુસ્વરૂપિણી ।
ઘણ્ટારવા ઘનરવા ઘનરૂપા ઘનોદરી ॥ ૩૯॥

ઘોરસત્વા ચ ઘનદા ઘણ્ટાનાદવિનોદની ।
ઘોરચાણ્ડાલિની ઘોરા ઘોરચણ્ડવિનાશિની ॥ ૪૦॥

ઘોરદાનવદમની ઘોરદાનવનાશિની ।
ઘોરકર્માદિરહિતા ઘોરકર્મનિષેવિતા ॥ ૪૧॥

ઘોરતત્વમયી દેવી ઘોરતત્વવિમોચની ।
ઘોરકર્માદિરહિતા ઘોરકર્માદિપૂરિતા ॥ ૪૨॥

ઘોરકર્માદિનિરતા ઘોરકર્મપ્રવર્દ્ધિની ।
ઘોરભૂતપ્રમથિની ઘોરવેતાલનાશિની ॥ ૪૩॥

ઘોરદાવાગ્નિદમની ઘોરશત્રુનિષૂદિની ।
ઘોરમન્ત્રયુતા ચૈવ ઘોરમન્ત્રપ્રપૂજિતા ॥ ૪૪॥

ઘોરમન્ત્રમનોભિજ્ઞા ઘોરમન્ત્રફલપ્રદા ।
ઘોરમન્ત્રનિધિશ્ચૈવ ઘોરમન્ત્રકૃતાસ્પદા ॥ ૪૫॥

ઘોરમન્ત્રેશ્વરી દેવી ઘોરમન્ત્રાર્થમાનસા ।
ઘોરમન્ત્રાર્થતત્વજ્ઞા ઘોરમન્ત્રાર્થપારગા ॥ ૪૬॥

ઘોરમન્ત્રાર્થવિભવા ઘોરમન્ત્રાર્થબોધિની ।
ઘોરમન્ત્રાર્થનિચયા ઘોરમન્ત્રાર્થજન્મભૂઃ ॥ ૪૭॥

ઘોરમન્ત્રજપરતા ઘોરમન્ત્રજપોદ્યતા ।
ઙકારવર્ણાનિલયા ઙકારાક્ષરમણ્ડિતા ॥ ૪૮॥

ઙકારાપરરૂપા ઙકારાક્ષરરૂપિણી ।
ચિત્રરૂપા ચિત્રનાડી ચારુકેશી ચયપ્રભા ॥ ૪૯॥

ચઞ્ચલા ચઞ્ચલાકારા ચારુરૂપા ચ ચણ્ડિકા ।

ચતુર્વેદમયી ચણ્ડા ચણ્ડાલગણમણ્ડિતા ॥ ૫૦॥

ચાણ્ડાલચ્છેદિની ચણ્ડતપોનિર્મૂલકારિણી ।
ચતુર્ભુજા ચણ્ડરૂપા ચણ્ડમુણ્ડવિનાશિની ॥ ૫૧॥

ચન્દ્રિકા ચન્દ્રકીર્તિશ્ચ ચન્દ્રકાન્તિસ્તથૈવ ચ ।
ચન્દ્રાસ્યા ચન્દ્રરૂપા ચ ચન્દ્રમૌલિસ્વરૂપિણી ॥ ૫૨॥

ચન્દ્રમૌલિપ્રિયા ચન્દ્રમૌલિસન્તુષ્ટમાનસા ।
ચકોરબન્ધુરમણી ચકોરબન્ધુપૂજિતા ॥ ૫૩॥

ચક્રરૂપા ચક્રમયી ચક્રાકારસ્વરૂપિણી ।
ચક્રપાણિપ્રિયા ચક્રપાણિપ્રીતિપ્રદાયિની ॥ ૫૪॥

ચક્રપાણિરસાભિજ્ઞા ચક્રપાણિવરપ્રદા ।
ચક્રપાણિવરોન્મત્તા ચક્રપાણિસ્વરૂપિણી ॥ ૫૫॥

ચક્રપાણિશ્વરી નિત્યં ચક્રપાણિનમસ્કૃતા ।
ચક્રપાણિસમુદ્ભૂતા ચક્રપાણિગુણાસ્પદા ॥ ૫૬॥

ચન્દ્રાવલી ચન્દ્રવતી ચન્દ્રકોટિસમપ્રભા ।
ચન્દનાર્ચિતપાદાબ્જા ચન્દનાન્વિતમસ્તકા ॥ ૫૭॥

ચારુકીર્તિશ્ચારુનેત્રા ચારુચન્દ્રવિભૂષણા ।
ચારુભૂષા ચારુવેષા ચારુવેષપ્રદાયિની ॥ ૫૮॥

ચારુભૂષાભૂષિતાઙ્ગી ચતુર્વક્ત્રવરપ્રદા ।
ચતુર્વક્ત્રસમારાધ્યા ચતુર્વક્ત્રસમાશ્રિતા ॥ ૫૯॥

ચતુર્વક્ત્રચતુર્વાહા ચતુર્થી ચ ચતુર્દશી ।
ચિત્રા ચર્મણ્વતી ચૈત્રી ચન્દ્રભાગા ચ ચમ્પકા ॥ ૬૦॥

ચતુર્દશયમાકારા ચતુર્દશયમાનુગા ।
ચતુર્દશયમપ્રીતા ચતુર્દશયમપ્રિયા ॥ ૬૧॥

છલસ્થા ચ્છિદ્રરૂપા ચ ચ્છદ્મદા ચ્છદ્મરાજિકા ।
છિન્નમસ્તા તથા ચ્છિન્ના ચ્છિન્નમુણ્ડવિધારિણી ॥ ૬૨॥

જયદા જયરૂપા ચ જયન્તી જયમોહિની ।
જયા જીવનસંસ્થા ચ જાલન્ધરનિવાસિની ॥ ૬૩॥

જ્વાલામુખી જ્વાલદાત્રી જાજ્વલ્યદહનોપમા ।
જગદ્વન્દ્યા જગત્પૂજ્યા જગત્ત્રાણપરાયણા ॥ ૬૪॥

જગતી જગતાધારા જન્મમૃત્યુજરાપહા ।
જનની જન્મભૂમિશ્ચજન્મદા જયશાલિની ॥ ૬૫॥

જ્વરરોગહરા જ્વાલા જ્વાલામાલાપ્રપૂરિતા ।
જમ્ભારાતીશ્વરી જમ્ભારાતિવૈભવકારિણી ॥ ૬૬॥

જમ્ભારાતિસ્તુતા જમ્ભારાતિશત્રુનિષૂદિની ।
જયદુર્ગા જયારાધ્યા જયકાલી જયેશ્વરી ॥ ૬૭॥

જયતારા જયાતીતા જયશઙ્કરવલ્લભા ।
જયદા જહ્નુતનયા જલધિત્રાસકારિણી ॥ ૬૮॥

જલધિવ્યાધિદમની જલધિજ્વરનાશિની ।
જઙ્ગમેશી જાડ્યહરા જાડ્યસઙ્ઘનિવારિણી ॥ ૬૯॥

જાડ્યગ્રસ્તજનાતીતા જાડ્યરોગનિવારિણી ।
જન્મદાત્રી જન્મહર્ત્રી જયઘોષસમન્વિતા ॥ ૭૦॥

જપયોગસમાયુક્તા જપયોગવિનોદિની ।
જપયોગપ્રિયા જાપ્યા જપાતીતા જયસ્વના ॥ ૭૧॥

જાયાભાવસ્થિતા જાયા જાયાભાવપ્રપૂરણી ।
જપાકુસુમસઙ્કાશા જપાકુસુમપૂજિતા ॥ ૭૨॥

જપાકુસુમસમ્પ્રીતા જપાકુસુમમણ્ડિતા ।
જપાકુસુમવદ્ભાસા જપાકુસુમરૂપિણી ॥ ૭૩॥

જમદગ્નિસ્વરૂપા ચ જાનકી જનકાત્મજા ।
ઝઞ્ઝાવાતપ્રમુક્તાઙ્ગી ઝોરઝઙ્કારવાસિની ॥ ૭૪॥

ઝઙ્કારકારિણી ઝઞ્ઝાવાતરૂપા ચ ઝઙ્કરી ।
ઞકારાણુસ્વરૂપા ચ ટનટઙ્કારનાદિની ॥ ૭૫॥

ટઙ્કારી ટકુવાણી ચ ઠકારાક્ષરરૂપિણી ।
ડિણ્ડિમા ચ તથા ડિમ્ભા ડિણ્ડુડિણ્ડિમનાદિની ॥ ૭૬॥

ઢક્કામયી ઢિલમયી નૃત્યશબ્દા વિલાસિની ।
ઢક્કા ઢક્કેશ્વરી ઢક્કાશબ્દરૂપા તથૈવ ચ ॥ ૭૭॥

ઢક્કાનાદપ્રિયા ઢક્કાનાદસન્તુષ્ટમાનસા ।
ણઙ્કારા ણાક્ષરમયી ણાક્ષરાદિસ્વરૂપિણી ॥ ૭૮॥

ત્રિપુરા ત્રિપુરમયી ચૈવ ત્રિશક્તિસ્ત્રિગુણાત્મિકા ।
તામસી ચ ત્રિલોકેશી ત્રિપુરા ચ ત્રયીશ્વરી ॥ ૭૯॥

ત્રિવિદ્યા ચ ત્રિરૂપા ચ ત્રિનેત્રા ચ ત્રિરૂપિણી ।
તારિણી તરલા તારા તારકારિપ્રપૂજિતા ॥ ૮૦॥

તારકારિસમારાધ્યા તારકારિવરપ્રદા ।
તારકારિપ્રસૂસ્તન્વી તરુણી તરલપ્રભા ॥ ૮૧॥

ત્રિરૂપા ચ ત્રિપુરગા ત્રિશૂલવરધારિણી ।
ત્રિશૂલિની તન્ત્રમયી તન્ત્રશાસ્ત્રવિશારદા ॥ ૮૨॥

તન્ત્રરૂપા તપોમૂર્તિસ્તન્ત્રમન્ત્રસ્વરૂપિણી ।
તડિત્તડિલ્લતાકારા તત્ત્વજ્ઞાનપ્રદાયિની ॥ ૮૩॥

તત્ત્વજ્ઞાનેશ્વરી દેવી તત્ત્વજ્ઞાનપ્રબોધિની ।
ત્રયીમયી ત્રયીસેવ્યા ત્ર્યક્ષરી ત્ર્યક્ષરેશ્વરી ॥ ૮૪॥

તાપવિધ્વંસિની તાપસઙ્ઘનિર્મૂલકારિણી ।
ત્રાસકર્ત્રી ત્રાસહર્ત્રી ત્રાસદાત્રી ચ ત્રાસહા ॥ ૮૫॥

તિથીશા તિથિરૂપા ચ તિથિસ્થા તિથિપૂજિતા ।
તિલોત્તમા ચ તિલદા તિલપ્રિતા તિલેશ્વરી ॥ ૮૬॥

ત્રિગુણા ત્રિગુણાકારા ત્રિપુરી ત્રિપુરાત્મિકા ।
ત્રિકુટા ત્રિકુટાકારા ત્રિકુટાચલમધ્યગા ॥ ૮૭॥

ત્રિજટા ચ ત્રિનેત્રા ચ ત્રિનેત્રવરસુન્દરી ।
તૃતીયા ચ ત્રિવર્ષા ચ ત્રિવિધા ત્રિમતેશ્વરી ॥ ૮૮॥

ત્રિકોણસ્થા ત્રિકોણેશી ત્રિકોણયન્ત્રમધ્યગા ।
ત્રિસન્ધ્યા ચ ત્રિસન્ધ્યાર્ચ્યા ત્રિપદા ત્રિપદાસ્પદા ॥ ૮૯॥

સ્થાનસ્થિતા સ્થલસ્થા ચ ધન્યસ્થલનિવાસિની ।
થકારાક્ષરરૂપા ચ સ્થલરૂપા તથૈવ ચ ॥ ૯૦॥

સ્થૂલહસ્તા તથા સ્થૂલા સ્થૈર્યરૂપપ્રકાશિની ।

દુર્ગા દુર્ગાર્તિહન્ત્રી ચ દુર્ગબન્ધવિમોચિની ॥ ૯૧॥

દેવી દાનવસંહન્ત્રી દનુજ્યેષ્ઠનિષૂદિની ।
દારાપત્યપ્રદા નિત્યા શઙ્કરાર્દ્ધાઙ્ગધારિણી ॥ ૯૨॥

દિવ્યાઙ્ગી દેવમાતા ચ દેવદુષ્ટવિનાશિની ।
દીનદુઃખહરા દીનતાપનિર્મૂલકારિણી ॥ ૯૩॥

દીનમાતા દીનસેવ્યા દીનદમ્ભવિનાશિની ।
દનુજધ્વંસિની દેવી દેવકી દેવવલ્લભા ॥ ૯૪॥

દાનવારિપ્રિયા દીર્ઘા દાનવારિપ્રપૂજિતા ।
દીર્ઘસ્વરા દીર્ઘતનુર્દીર્ઘદુર્ગતિનાશિની ॥ ૯૫॥

દીર્ઘનેત્રા દીર્ઘચક્ષુર્દીર્ઘકેશી દિગમ્બરા ।
દિગમ્બરપ્રિયા દાન્તા દિગમ્બરસ્વરૂપિણી ॥ ૯૬॥

દુઃખહીના દુઃખહરા દુઃખસાગરતારિણી ।
દુઃખદારિદ્ર્યશમની દુઃખદારિદ્ર્યકારિણી ॥ ૯૭॥

દુઃખદા દુસ્સહા દુષ્ટખણ્ડનૈકસ્વરૂપિણી ।
દેવવામા દેવસેવ્યા દેવશક્તિપ્રદાયિની ॥ ૯૮॥

દામિની દામિનીપ્રીતા દામિનીશતસુન્દરી ।
દામિનીશતસંસેવ્યા દામિનીદામભૂષિતા ॥ ૯૯॥

દેવતાભાવસન્તુષ્ટા દેવતાશતમધ્યગા ।
દયાર્દ્રા ચ દયારૂપા દયાદાનપરાયણા ॥ ૧૦૦॥

દયાશીલા દયાસારા દયાસાગરસંસ્થિતા ।
દશવિદ્યાત્મિકા દેવી દશવિદ્યાસ્વરૂપિણી ॥ ૧૦૧॥

ધરણી ધનદા ધાત્રી ધન્યા ધન્યપરા શિવા ।
ધર્મરૂપા ધનિષ્ઠા ચ ધેયા ચ ધીરગોચરા ॥ ૧૦૨॥

ધર્મરાજેશ્વરી ધર્મકર્મરૂપા ધનેશ્વરી ।
ધનુર્વિદ્યા ધનુર્ગમ્યા ધનુર્દ્ધરવરપ્રદા ॥ ૧૦૩॥

ધર્મશીલા ધર્મલીલા ધર્મકર્મવિવર્જિતા ।
ધર્મદા ધર્મનિરતા ધર્મપાખણ્ડખણ્ડિની ॥ ૧૦૪॥

ધર્મેશી ધર્મરૂપા ચ ધર્મરાજવરપ્રદા ।
ધર્મિણી ધર્મગેહસ્થા ધર્માધર્મસ્વરૂપિણી ॥ ૧૦૫॥

ધનદા ધનદપ્રીતા ધનધાન્યસમૃદ્ધિદા ।
ધનધાન્યસમૃદ્ધિસ્થા ધનધાન્યવિનાશિની ॥ ૧૦૬॥

ધર્મનિષ્ઠા ધર્મધીરા ધર્મમાર્ગરતા સદા ।
ધર્મબીજકૃતસ્થાના ધર્મબીજસુરક્ષિણી ॥ ૧૦૭॥

ધર્મબીજેશ્વરી ધર્મબીજરૂપા ચ ધર્મગા ।
ધર્મબીજસમુદ્ભૂતા ધર્મબીજસમાશ્રિતા ॥ ૧૦૮॥

ધરાધરપતિપ્રાણા ધરાધરપતિસ્તુતા ।
ધરાધરેન્દ્રતનુજા ધરાધરેન્દ્રવન્દિતા ॥ ૧૦૯॥

ધરાધરેન્દ્રગેહસ્થા ધરાધરેન્દ્રપાલિની ।
ધરાધરેન્દ્રસર્વાર્તિનાશિની ધર્મપાલિની ॥ ૧૧૦॥

નવીના નિર્મ્મલા નિત્યા નાગરાજપ્રપૂજિતા ।
નાગેશ્વરી નાગમાતા નાગકન્યા ચ નગ્નિકા ॥ ૧૧૧॥

નિર્લેપા નિર્વિકલ્પા ચ નિર્લોમા નિરુપદ્રવા ।
નિરાહારા નિરાકારા નિરઞ્જનસ્વરૂપિણી ॥ ૧૧૨॥

નાગિની નાગવિભવા નાગરાજપરિસ્તુતા ।
નાગરાજગુણજ્ઞા ચ નાગરાજસુખપ્રદા ॥ ૧૧૩॥

નાગલોકગતા નિત્યં નાગલોકનિવાસિની ।
નાગલોકેશ્વરી નાગભાગિની નાગપૂજિતા ॥ ૧૧૪॥

નાગમધ્યસ્થિતા નાગમોહસંક્ષોભદાયિની ।
નૃત્યપ્રિયા નૃત્યવતી નૃત્યગીતપરાયણા ॥ ૧૧૫॥

નૃત્યેશ્વરી નર્તકી ચ નૃત્યરૂપા નિરાશ્રયા ।
નારાયણી નરેન્દ્રસ્થા નરમુણ્ડાસ્થિમાલિની ॥ ૧૧૬॥

નરમાંસપ્રિયા નિત્યા નરરક્તપ્રિયા સદા ।
નરરાજેશ્વરી નારીરૂપા નારીસ્વરૂપિણી ॥ ૧૧૭॥

નારીગણાર્ચિતા નારીમધ્યગા નૂતનામ્બરા ।
નર્મદા ચ નદીરૂપા નદીસઙ્ગમસંસ્થિતા ॥ ૧૧૮॥

નર્મદેશ્વરસમ્પ્રીતા નર્મદેશ્વરરૂપિણી ।
પદ્માવતી પદ્મમુખી પદ્મકિઞ્જલ્કવાસિની ॥ ૧૧૯॥

પટ્ટવસ્ત્રપરીધાના પદ્મરાગવિભૂષિતા ।
પરમા પ્રીતિદા નિત્યં પ્રેતાસનનિવાસિની ॥ ૧૨૦॥

પરિપૂર્ણરસોન્મત્તા પ્રેમવિહ્વલવલ્લભા ।
પવિત્રાસવનિષ્પૂતા પ્રેયસી પરમાત્મિકા ॥ ૧૨૧॥

પ્રિયવ્રતપરા નિત્યં પરમપ્રેમદાયિની ।
પુષ્પપ્રિયા પદ્મકોશા પદ્મધર્મનિવાસિની ॥ ૧૨૨॥

ફેત્કારિણી તન્ત્રરૂપા ફેરુફેરવનાદિની ।
વંશિની વંશરૂપા ચ બગલા વામરૂપિણી ॥ ૧૨૩॥

વાઙ્મયી વસુધા ધૃષ્યા વાગ્ભવાખ્યા વરા નરા ।
બુદ્ધિદા બુદ્ધિરૂપા ચ વિદ્યા વાદસ્વરૂપિણી ॥ ૧૨૪॥

બાલા વૃદ્ધમયીરૂપા વાણી વાક્યનિવાસિની ।
વરુણા વાગ્વતી વીરા વીરભૂષણભૂષિતા ॥ ૧૨૫॥

વીરભદ્રાર્ચિતપદા વીરભદ્રપ્રસૂરપિ ।
વેદમાર્ગરતા વેદમન્ત્રરૂપા વષટ્ પ્રિયા ॥ ૧૨૬॥

વીણાવાદ્યસમાયુક્તા વીણાવાદ્યપરાયણા ।
વીણારવા તથા વીણાશબ્દરૂપા ચ વૈષ્ણવી ॥ ૧૨૭॥

વૈષ્ણવાચારનિરતા વૈષ્ણવાચારતત્પરા ।
વિષ્ણુસેવ્યા વિષ્ણુપત્ની વિષ્ણુરૂપા વરાનના ॥ ૧૨૮॥

વિશ્વેશ્વરી વિશ્વમાતા વિશ્વનિર્માણકારિણી ।
વિશ્વરૂપા ચ વિશ્વેશી વિશ્વસંહારકારિણી ॥ ૧૨૯॥

ભૈરવી ભૈરવારાધ્યા ભૂતભૈરવસેવિતા ।
ભૈરવેશી તથા ભીમા ભૈરવેશ્વરતુષ્ટિદા ॥ ૧૩૦॥

ભૈરવાધિશરમણી ભૈરવાધિશપાલિની ।
ભીમેશ્વરી ભીમમાતા ભીમશબ્દપરાયણા ॥ ૧૩૧॥

ભીમરૂપા ચ ભીમેશી ભીમા ભીમવરપ્રદા ।

ભીમપૂજિતપાદાબ્જા ભીમભૈરવપાલિની ॥ ૧૩૨॥

ભીમાસુરધ્વંસકરી ભીમદુષ્ટવિનાશિની ।
ભુવના ભુવનારાધ્યા ભવાની ભૂતિદા સદા ॥ ૧૩૩॥

ભયદા ભયહન્ત્રી ચ અભયા ભયરૂપિણી ।
ભીમનાદા વિહ્વલા ચ ભયભીતિવિનાશિની ॥ ૧૩૪॥

મત્તા પ્રમત્તરૂપા ચ મદોન્મત્તસ્વરૂપિણી ।
માન્યા મનોજ્ઞા માના ચ મઙ્ગલા ચ મનોહરા ॥ ૧૩૫॥

માનનીયા મહાપૂજ્યા મહામહિષમર્દ્દિની ।
મહિષાસુરહન્ત્રી ચ માતઙ્ગી મયવાસિની ॥ ૧૩૬॥

માધ્વી મધુમયી મુદ્રા મુદ્રિકા મન્ત્રરૂપિણી ।
મહાવિશ્વેશ્વરી દૂતી મૌલિચન્દ્રપ્રકાશિની ॥ ૧૩૭॥

યશઃસ્વરૂપિણી દેવી યોગમાર્ગપ્રદાયિની ।
યોગિની યોગગમ્યા ચ યામ્યેશી યોગરૂપિણી ॥ ૧૩૮॥

યજ્ઞાઙ્ગી ચ યોગમયી જપરૂપા જપાત્મિકા ।
યુગાખ્યા ચ યુગાન્તા ચ યોનિમણ્ડલવાસિની ॥ ૧૩૯॥

અયોનિજા યોગનિદ્રા યોગાનન્દપ્રદાયિની ।
રમા રતિપ્રિયા નિત્યં રતિરાગવિવર્દ્ધિની ॥ ૧૪૦॥

રમણી રાસસમ્ભૂતા રમ્યા રાસપ્રિયા રસા ।
રણોત્કણ્ઠા રણસ્થા ચ વરા રઙ્ગપ્રદાયિની ॥ ૧૪૧॥

રેવતી રણજૈત્રી ચ રસોદ્ભૂતા રણોત્સવા ।
લતા લાવણ્યરૂપા ચ લવણાબ્ધિસ્વરૂપિણી ॥ ૧૪૨॥

લવઙ્ગકુસુમારાધ્યા લોલજિહ્વા ચ લેલિહા ।
વશિની વનસંસ્થા ચ વનપુષ્પપ્રિયા વરા ॥ ૧૪૩॥

પ્રાણેશ્વરી બુદ્ધિરૂપા બુદ્ધિદાત્રી બુધાત્મિકા ।
શમની શ્વેતવર્ણા ચ શાઙ્કરી શિવભાષિણી ॥ ૧૪૪॥

શ્યામ્યરૂપા શક્તિરૂપા શક્તિબિન્દુનિવાસિની ।
સર્વેશ્વરી સર્વદાત્રી સર્વમાતા ચ શર્વરી ॥ ૧૪૫॥

શામ્ભવી સિદ્ધિદા સિદ્ધા સુષુમ્ના સુરભાસિની ।
સહસ્રદલમધ્યસ્થા સહસ્રદલવર્ત્તિની ॥ ૧૪૬॥

હરપ્રિયા હરધ્યેયા હૂઁકારબીજરૂપિણી ।
લઙ્કેશ્વરી ચ તરલા લોમમાંસપ્રપૂજિતા ॥ ૧૪૭॥

ક્ષેમ્યા ક્ષેમકરી ક્ષામા ક્ષીરબિન્દુસ્વરૂપિણી ।
ક્ષિપ્તચિત્તપ્રદા નિત્યં ક્ષૌમવસ્ત્રવિલાસિની ॥ ૧૪૮॥

છિન્ના ચ ચ્છિન્નરૂપા ચ ક્ષુધા ક્ષૌત્કારરૂપિણી ।
સર્વવર્ણમયી દેવી સર્વસમ્પત્પ્રદાયિની ॥ ૧૪૯॥

સર્વસમ્પત્પ્રદાત્રી ચ સમ્પદાપદ્વિભૂષિતા ।
સત્ત્વરૂપા ચ સર્વાર્થા સર્વદેવપ્રપૂજિતા ॥ ૧૫૦॥

સર્વેશ્વરી સર્વમાતા સર્વજ્ઞા સુરસૃત્મિકા ।
સિન્ધુર્મન્દાકિની ગઙ્ગા નદીસાગરરૂપિણી ॥ ૧૫૧॥

સુકેશી મુક્તકેશી ચ ડાકિની વરવર્ણિની ।
જ્ઞાનદા જ્ઞાનગગના સોમમણ્ડલવાસિની ॥ ૧૫૨॥

આકાશનિલયા નિત્યા પરમાકાશરૂપિણી ।
અન્નપૂર્ણા મહાનિત્યા મહાદેવરસોદ્ભવા ॥ ૧૫૩॥

મઙ્ગલા કાલિકા ચણ્ડા ચણ્ડનાદાતિભીષણા ।
ચણ્ડાસુરસ્ય મથિની ચામુણ્ડા ચપલાત્મિકા ॥ ૧૫૪॥

ચણ્ડી ચામરકેશી ચ ચલત્કુણ્ડલધારિણી ।
મુણ્ડમાલાધરા નિત્યા ખણ્ડમુણ્ડવિલાસિની ॥ ૧૫૫॥

ખડ્ગહસ્તા મુણ્ડહસ્તા વરહસ્તા વરપ્રદા ।
અસિચર્મધરા નિત્યા પાશાઙ્કુશધરા પરા ॥ ૧૫૬॥

શૂલહસ્તા શિવહસ્તા ઘણ્ટાનાદવિલાસિની ।
ધનુર્બાણધરાઽઽદિત્યા નાગહસ્તા નગાત્મજા ॥ ૧૫૭॥

મહિષાસુરહન્ત્રી ચ રક્તબીજવિનાશિની ।
રક્તરૂપા રક્તગા ચ રક્તહસ્તા ભયપ્રદા ॥ ૧૫૮॥

અસિતા ચ ધર્મધરા પાશાઙ્કુશધરા પરા ।
ધનુર્બાણધરા નિત્યા ધૂમ્રલોચનનાશિની ॥ ૧૫૯॥

પરસ્થા દેવતામૂર્તિઃ શર્વાણી શારદા પરા ।
નાનાવર્ણવિભૂષાઙ્ગી નાનારાગસમાપિની ॥ ૧૬૦॥

પશુવસ્ત્રપરીધાના પુષ્પાયુધધરા પરા ।
મુક્તરઞ્જિતમાલાઢ્યા મુક્તાહારવિલાસિની ॥ ૧૬૧॥

સ્વર્ણકુણ્ડલભૂષા ચ સ્વર્ણસિંહાસનસ્થિતા ।
સુન્દરાઙ્ગી સુવર્ણાભા શામ્ભવી શકટાત્મિકા ॥ ૧૬૨॥

સર્વલોકેશવિદ્યા ચ મોહસમ્મોહકારિણી ।
શ્રેયસી સૃષ્ટિરૂપા ચ ચ્છિન્નચ્છદ્મમયી ચ્છલા ॥ ૧૬૩॥

છિન્નમુણ્ડધરા નિત્યા નિત્યાનન્દવિધાયિની ।
નન્દા પૂર્ણા ચ રિક્તા ચ તિથયઃ પૂર્ણષોડશી ॥ ૧૬૪॥

કુહૂઃ સઙ્ક્રાન્તિરૂપા ચ પઞ્ચપર્વવિલાસિની ।
પઞ્ચબાણધરા નિત્યા પઞ્ચમપ્રીતિદા પરા ॥ ૧૬૫॥

પઞ્ચપત્રાભિલાષા ચ પઞ્ચામૃતવિલાસિની ।
પઞ્ચાલી પઞ્ચમી દેવી પઞ્ચરક્તપ્રસારિણી ॥ ૧૬૬॥

પઞ્ચબાણધરા નિત્યા નિત્યદાત્રી દયાપરા ।
પલલાદિપ્રિયા નિત્યાઽપશુગમ્યા પરેશિતા ॥ ૧૬૭॥

પરા પરરહસ્યા ચ પરમપ્રેમવિહ્વલા ।
કુલિના કેશિમાર્ગસ્થા કુલમાર્ગપ્રકાશિની ॥ ૧૬૮॥

કુલાકુલસ્વરૂપા ચ કુલાર્ણવમયી કુલા ।
રુક્મા ચ કાલરૂપા ચ કાલકમ્પનકારિણી ॥ ૧૬૯॥

વિલાસરૂપિણી ભદ્રા કુલાકુલનમસ્કૃતા ।
કુબેરવિત્તધાત્રી ચ કુમારજનની પરા ॥ ૧૭૦॥

કુમારીરૂપસંસ્થા ચ કુમારીપૂજનામ્બિકા ।
કુરઙ્ગનયના દેવી દિનેશાસ્યાઽપરાજિતા ॥ ૧૭૧॥

કુણ્ડલીકદલી સેના કુમાર્ગરહિતા વરા ।
અનતરૂપાઽનન્તસ્થા આનન્દસિન્ધુવાસિની ॥ ૧૭૨॥

ઇલાસ્વરૂપિણી દેવી ઇઈભેદભયઙ્કરી ।

ઇડા ચ પિઙ્ગલા નાડી ઇકારાક્ષરરૂપિણી ॥ ૧૭૩॥

ઉમા ચોત્પત્તિરૂપા ચ ઉચ્ચભાવવિનાશિની ।
ઋગ્વેદા ચ નિરારાધ્યા યજુર્વેદપ્રપૂજિતા ॥ ૧૭૪॥

સામવેદેન સઙ્ગીતા અથર્વવેદભાષિણી ।
ઋકારરૂપિણી ઋક્ષા નિરક્ષરસ્વરૂપિણી ॥ ૧૭૫॥

અહિદુર્ગાસમાચારા ઇકારાર્ણસ્વરૂપિણી ।
ૐકારા પ્રણવસ્થા ચ ૐકારાદિસ્વરૂપિણી ॥ ૧૭૬॥

અનુલોમવિલોમસ્થા થકારવર્ણસમ્ભવા ।
પઞ્ચાશદ્વર્ણબીજાઢ્યા પઞ્ચાશન્મુણ્ડમાલિકા ॥ ૧૭૭॥

પ્રત્યેકા દશસંખ્યા ચ ષોડશી છ્છિન્નમસ્તકા ।
ષડઙ્ગયુવતીપૂજ્યા ષડઙ્ગરૂપવર્જિતા ॥ ૧૭૮॥

ષડ્વક્ત્રસંશ્રિતા નિત્યા વિશ્વેશી ખડ્ગદાલયા ।
માલામન્ત્રમયી મન્ત્રજપમાતા મદાલસા ॥ ૧૭૯॥

સર્વવિશ્વેશ્વરી શક્તિઃ સર્વાનન્દપ્રદાયિની ।

ઇતિ શ્રીછ્છિન્નમસ્તાયા નામસહસ્રમુત્તમમ્ ॥ ૧૮૦॥

પૂજાક્રમેણ કથિતં સાધકાનાં સુખાવહમ્ ।
ગોપનીયં ગોપનીયં ગોપનીયં ન સંશયઃ ॥ ૧૮૧॥

અર્દ્ધરાત્રે મુક્તકેશો ભક્તિયુક્તો ભવેન્નરઃ ।
જપિત્વા પૂજયિત્વા ચ પઠેન્નામસહસ્રકમ્ ॥ ૧૮૨॥

વિદ્યાસિદ્ધિર્ભવેત્તસ્ય ષણ્માસાભ્યાસયોગતઃ ।
યેન કેન પ્રકારેણ દેવીભક્તિપરો ભવેત્ ॥ ૧૮૩॥

અખિલાન્સ્તમ્ભયેલ્લોકાંરાજ્ઞોઽપિ મોહયેત્સદા ।
આકર્ષયેદ્દેવશક્તિં મારયેદ્દેવિ વિદ્વિષમ્ ॥ ૧૮૪॥

શત્રવો દાસતાં યાન્તિ યાન્તિ પાપાનિ સંક્ષયમ્ ।
મૃત્યુશ્ચ ક્ષયતાં યાતિ પઠનાદ્ભાષણાત્પ્રિયે ॥ ૧૮૫॥

પ્રશસ્તાયાઃ પ્રસાદેન કિં ન સિદ્ધ્યતિ ભૂતલે ।
ઇદં રહસ્યં પરમં પરં સ્વસ્ત્યયનં મહત્ ॥ ૧૮૬॥

ધૃત્વા બાહૌ મહાસિદ્ધિઃ પ્રાપ્યતે નાત્ર સંશયઃ ।
અનયા સદૃશી વિદ્યા વિદ્યતે ન મહેશ્વરિ ॥ ૧૮૭॥

વારમેકં તુ યોઽધીતે સર્વસિદ્ધીશ્વરો ભવેત્ ।
કુલવારે કુલાષ્ટમ્યાં કુહૂસઙ્ક્રાન્તિપર્વસુ ॥ ૧૮૮॥

યશ્ચેમં પઠતે વિદ્યાં તસ્ય સમ્યક્ફલં શ‍ૃણુ ।
અષ્ટોત્તરશતં જપ્ત્વા પઠેન્નામસહસ્રકમ્ ॥ ૧૮૯॥

ભક્ત્યા સ્તુત્વા મહાદેવિ સર્વપાપાત્પ્રમુચ્યતે ।
સર્વપાપૈર્વિનિર્મુક્તઃ સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૧૯૦॥

અષ્ટમ્યાં વા નિશીથે ચ ચતુષ્પથગતો નરઃ ।
માષભક્તબલિં દત્વા પઠેન્નામસહસ્રકમ્ ॥ ૧૯૧॥

સુદર્શવામવેદ્યાં તુ માસત્રયવિધાનતઃ ।
દુર્જયઃ કામરૂપશ્ચ મહાબલપરાક્રમઃ ॥ ૧૯૨॥

કુમારીપૂજનં નામ મન્ત્રમાત્રં પઠેન્નરઃ ।
એતન્મન્ત્રસ્ય પઠનાત્સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૧૯૩॥

ઇતિ તે કથિતં દેવિ સર્વસિદ્ધિપરં નરઃ ।
જપ્ત્વા સ્તુત્વા મહાદેવીં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૯૪॥

ન પ્રકાશ્યમિદં દેવિ સર્વદેવનમસ્કૃતમ્ ।
ઇદં રહસ્યં પરમં ગોપ્તવ્યં પશુસઙ્કટે ॥ ૧૯૫॥

ઇતિ સકલવિભૂતેર્હેતુભૂતં પ્રશસ્તં પઠતિ
ય ઇહ મર્ત્યશ્છિન્નમસ્તાસ્તવં ચ ।
ધનદ ઇવ ધનાઢ્યો માનનીયો નૃપાણાં સ ભવતિ
ચ જનાનામાશ્રયઃ સિદ્ધિવેત્તા ॥ ૧૯૬॥

॥ ઇતિ શ્રીવિશ્વસારતન્ત્રે શિવપાર્વતીસંવાદે
શ્રીચ્છિન્નમસ્તાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrI ChinnamastA sahasranAma stotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*